International Journal of Sanskrit Research 2019; 5(1): 48-49

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(1): 48-49
© 2019 IJSR
www.anantaajournal.com
Received: 06-11-2018
Accepted: 11-12-2018

**डॉ० सिद्धि कुमार झाः**
विष्णबरुआरः, खजौली, मधुबनी, बिहार, भारत

**Corresponding Author:**
**डॉ० सिद्धि कुमार झाः**
विष्णबरुआरः, खजौली, मधुबनी, बिहार, भारत

# व्याकरणशास्त्रीयोदाहरणविषयकग्रन्थायां परिचयः

**डॉ० सिद्धि कुमार झाः**

**सारांश**
व्याकरणशास्त्रं भाषायाः प्रत्यंगं सूक्ष्मतया विश्लेषणं करोति। प्रतिशब्दं प्रकृतिप्रत्ययविभागः भवति। प्रतिविभागं मूलप्रकृतिभाागाश्रितानां सहस्रशः शब्दानां बोधनञ्च कारयति। अत्र येषां रुचिरस्ति ते विवेचनां कृत्वा कृत्वा अनिर्वचनीयमानन्देन सहैव ऐतिहासिकं तथ्यमपि प्राप्नुवन्ति। परन्तु येषां रुचिरत्र नास्ति ते व्याकरणं भारस्वरुपं परमं कठिनं जानन्ति। संदर्भेऽस्मिन् महर्षिणा पतञ्जलिना महाभाष्ये उद्धृतः [1]–

**''वेदान्नो वैदिकाः शब्दाः**
**सिद्धा लोकाच्च लौकिकाः।**
**अनर्थकं व्याकरणमिति।''**

**प्रस्तावना**
व्यारकणं भारस्वरुपं ये मन्यन्ते तान् विपरितबुद्धीन् वैयाकरणाः अनेकधा बोधयन्ति [2]– ''रक्षोहागमलध्वसंदेहाः प्रयोजनम्'' ''इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि'', ''अध्येयं व्याकरणम्'' इत्यादि।
अपरे वैयाकरणा [3] केवलं प्रकृति प्रत्ययाधारेण सिद्धशब्दस्वरुपाण्येव प्रदर्श्य तान् शिक्षयन्ति। अनेन ते नियमानां जटिलतां परिहरन्ति। इदृशी परम्परा आदिकालत एव प्रचलितास्ति। महाभाष्ययकारेण एका पुराकथा [4] प्रस्तुता यत् पुरा प्रतिपदपाठरूपेणैव भाषाशिक्षणं भवति स्म। पदं पदं प्रति प्रतिपदं, तस्य पाठः प्रतिपदपाठः। पदानां क्रमशः सिद्धरुपाणां पारायणमित्यर्थः [5]–गैरश्वः पुरुषो हस्ती शकुनि र्मृगो ब्राह्मण'' इति।
ततः परम् इन्द्रेण प्रकृति प्रत्ययविभागरूपः संस्कारः शब्देषु कृतः [6]। तत्संस्कारवशादेव देवभाषायाः नामैव 'संस्कृतम्' अभवत्। परन्तु विदुषां धारणा इदृशी वर्तते यत् तत्रापि बहवः सिद्धप्रयोगा एव निरुपिता आसन्। अतएव संस्कृतव्याकरणे सम्प्रदायद्वयम् अभवत्– (1) माहेश्वरसम्प्रदायः (2) ऐन्द्रसम्प्रदायश्च। तत्राद्य सम्प्रदायमाधृत्य पाणिनीयं [6] शब्दानुशासनम् अपरञ्चाश्रित्य कातन्त्रं व्याकरणमिति। कातन्त्रव्याकरणं दृष्ट्वा अनुमातुं शक्यते ऐन्द्रव्याकरणस्य स्वरुपम्, परन्तु नाधुना प्राक्पाणिनेः किमपि व्याकरणं प्राप्यते।
ततः परं पौराणिकं व्याकरणं सिद्धप्रयोगात्मकं प्राप्यते–अग्निपुराणे, नारदपुराणे च। तत्रपि नियमापेक्षया प्रयोगदर्शनस्य बाहुल्यं दृश्यते। यथा–

**''मरुत् मरुद्भ्यां मरुति एवं शत्रुजिदादयः।**
**भवान् भवन्तौ भवतां भवंश्चैव भवत्यपि।।** [7]
**प्रथिमा चेमनि पृथोः सौख्यं सुखात् ष्यञीरितम्।**
**स्तेयं याति च स्तेनस्य ये सख्युः सख्यमीरितम्।।** [8]
**गोमायु र्वायु र्वेदेषु बहुलं स्युरुणादयः।**
**आयुः स्वादुश्च हेत्वाद्याः किंशारु र्धान्यशूककः।।** [9]

प्रयोगद्वारा व्याकरणशिक्षणक्रमे अनेकैः कविभिः काव्यानि रचितानि। काव्यकथावर्णनक्रमेणैव व्याकरणप्रकरणमपि प्रचलति। एतत्क्रमे व्याकरणशिक्षणकाव्यानां विवरणं प्रस्तूयते–
1) भट्टभूमः (600 ई0) – अनेन 'अर्जुनरावणीयं काव्यं विरचितं यत्र अष्टाध्याय्याः सूत्रानुसारं तदुदाहरणप्रदर्शनपरकाणि पद्यानि कथावस्तुसन्तुलितानि प्रस्तुतानि। [10] एतत्काव्यस्य वासुदेवकृता व्याख्यापि वर्तते।

2) भट्टिः (650 ई0) अस्य नाम भट्टिः, भर्तृहरिश्च प्रसिद्धयति। भट्टिकवेर्नाम अतिप्रसिद्धमिति तत्कृतं रावणवधमहाकाव्यं भट्टिकाव्यनाम्नैव प्रसिद्धम्। अस्य पितुर्नाम श्रीस्वामी आसीत्। [11] तदनुसारमयं वाक्यपदीयकाराद् भर्तृहरेः, भागवृत्तिकाराद् बौद्धभर्तृहरेश्च भिन्न एव प्रतीयते। अयं व्याकरणप्रक्रियानुसारं स्वयं प्रकरणक्रमे काव्यं व्यवस्थापयति। अस्य कवित्वोदाहरणतया पद्यमेकं प्रस्तूयते [12]–

**''न तज्जलं यन्न सुचारु पड्.कजं, न पंकजं तद् यदलीनषट्पदम्।**
**न षट्प्रदोऽसौ न जुगुञ्ज यः कलं, न गुञ्जितं तन्न जहार यन्मनः।।''**

3) हलायुधः (1000ई0) 'कविरहस्य'– नामकस्य धातुरुपबोधककाव्यस्य रचयिता हलायुधः वर्तते। काव्येऽस्मिन् 'राष्ट्रकूट' देशाधिपतेः कृष्णराजस्य (तृतीयस्य) गुणवर्णनं कृतवान्। [13] अनेन पिंगलच्छन्छःसूत्राणामपि व्याख्या कृता। मिथिलायां सोदरपुरवंशे बीजित्वेन हलायुधस्य उल्लेखः प्राप्यते, [14] यस्य कालो दशमी शताब्दी आसीत्। अत्र काव्यक्रमे धातूनां तद्रूपाणां तिड.न्तानां कृदन्तानां च बोधनं कृतमस्ति।
4) हेमचन्द्रः (1100ई0) सिद्धहैमशब्दानुशासनकारो हेमचन्द्रः ''कुमारपालचरितं'' नाम काव्यं रचितवान्। अनेन काव्येन संस्कृतव्याकरणस्य प्राकृतव्यारकरणस्य च शिक्षा दीयते।
5) वासुदेवः (1200ई0) वासुदेवविजयकाव्यकारो वासुदेवः एतद्द्वारा व्याकरणशिक्षां दत्तवान्। अत्र 6 सर्गाः सन्ति। [15]
6) नारायणकविः (1550 ई0) धातुकाव्यकारो नारायणकविः व्याकरणानुसारमुदाहरणमयं काव्यमिदं रचितवान्। अनेनैव ''अपाणिनीयप्रमाणिकता'' नामको लघुग्रन्थः प्रणीतः। प्रक्रियासर्वस्वकारो नारायणभट्टः [16] अस्मादभिन्न केरलदेशवासी आसीत्। अस्य व्याख्या रामपाणिवादयण्डितेन कृतास्ति।
व्याकरणशास्त्रे प्रयोगनिरूपणपरो मौलिको ग्रन्थो वररुचिना प्रणीतः प्रयोगसंग्रहः यत्र केवलं 25 श्लोकाः सन्ति। ग्रन्थस्यास्य व्याख्यापि तनैव प्रयोगविवेकाख्या रचिता। अग्निपुराणीया छाया अत्र विलोक्यते। सुपद्मव्याकरणकारः पद्मनाभदत्तमिश्रः प्रयोगदीपिकां रचितवान् [17] (1450ई0) तस्याः चर्चां स स्वग्रन्थे कृतवान्। प्रयोगविषयकग्रन्थरचना तस्य व्याकरणसरलीकारणोपाय एव प्रतीयते।
प्रयोगरत्नमाला व्याकरणं वंगदेशे प्रचलति। तत्र प्रयोगा भृशं निरुपिताः सन्ति। [18] 1500 ई0 वर्षे म0 म0 भवनाथोपाध्यायेन मैथिलेन एकोऽभिनवो व्याकरणग्रन्थः कारिकामयः प्रणीतः प्रयोगपल्लवनामकः [19] यस्य कल्पलताटीकापि तेन स्वयं कृता।
तेनोक्तम्–

**''अगणितसूत्रान्वेषण–खिन्नाः किं रे! वृथा भवथ।**
**बलाः! प्रयोगमालाः, पल्लवयत पल्लवं वीक्ष्य।। [20]**

ग्रन्थेऽस्मिन् धातुनां तिड.न्त–कृदन्तरुपाणि स्वविष्कृतनियमैः प्रदर्शितानि। अत्र पाणिनीया धावतः सानुबन्धाः स्वीकृत्य तत्रैवागमादेशलोपादिभिः प्रयोगशिक्षार्थमुपन्यस्ताः सन्ति। अस्य ग्रन्थस्य व्याख्या पं0 विश्वेश्वरमिश्रकृता (1550ई0) विद्यते।

## निष्कर्ष

1900 ई0 वर्षे म0 म0 परमेश्वर झा शर्मा 'प्रयोगदर्पण' नामकं ग्रन्थं प्रणीतवान्। महाकविः अम्बिकादत्त व्यासः 'गुप्ताशुद्धिप्रर्शनम्, प्रयोगनिरुपणात्मकं प्रणीतवान्। पं0 महादेवशास्त्रिकृतं 'गुढ़ाशुद्धिप्रदर्शनम्, पं0 जीवनाथ झा शर्मकृतं 'व्याकरणकौतुकम्' इत्यादिग्रन्थाः प्रयोगमाध्यमेन व्याकरणशिक्षकाः सन्ति।

## संदर्भाः


1. महाभाष्य– पस्पशाह्निकम्।
2. तत्रैव
3. अग्निपुराणीयं व्याकरणं, नारदपुराणीयञ्च व्याकरणम्।
4. ''वृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच, नान्तं जगाम''– महाभाष्यं पस्पशाह्निकम्।
5. महाभाष्यम्– प्रथमाह्निकम्।
6. तैत्तिरीयारण्यकम्–
7. अग्निपुराणम्– 350–59–60
8. अग्निपुराणम् – 355–28, 29
9. अग्नि पुराणम् – 356– 1,2
10. संस्कृतव्याकरणशास्त्र का इतिहास भाग– 2, पृ0 477
11. सं0 व्याकरणशास्त्र का इतिहास भाग–2 पृ0 482
12. भट्टिकाव्यस्थं शरद्वर्णनम्।
13. सं0 व्याकरणशास्त्र का इतिहास भाग–2, पृ0 491
14. मैथिली वंशपञ्जी (हस्तलेखः) संस्कृतविश्वविद्यालयः, दरभंगा
15. सं0 व्याकरणशास्त्र का इतिहास भाग–2– पृ0–493
16. सं0. व्यारकणशास्त्र इतिहास भाग–2 पृ0– 494
17. प्रबन्धकुसुमाञ्जलिः – डॉ जयमन्त मिश्रः– पृ0 120
18. प्रयोगपल्लवः भूमिका – पृ0 2 – डॉ शशिनाथ झा
19. प्रयोगपल्लवः– सं0 दरभंगा 1985 ई0 डॉ शशिनाथ झा
20. प्रयोगपल्लवः – 1–2